योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०४७

सप्तचत्वारिंशः सर्गः ४७

श्रीवसिष्ठ उवाच ।

एतस्मिन्वर्तमाने तु घोरे समरसंगमे ।

लीलाद्वयमुवाचेदं ज्ञप्तिं भगवतीं पुनः ।। १

लीलाद्वयमुवाच ।

देवि कस्मादकस्मान्नौ भर्ता जयति नौ रणे ।

वद त्वय्यपि तुष्टायामस्मिन्विद्रुतवारणे ।। २

श्रीसरस्वत्युवाच ।

चिरमाराधितानेन विदूरथनृपारिणा ।

अहं पुत्रि जयार्थेन न विदूरथभूभृता ।। ३

तेनासावेव जयति जीयते च विदूरथः ।

ज्ञप्तिरन्तर्गता संविदेतां मां यो यदा यथा ।। ४

प्रेरयत्याशु तत्तस्य तदा संपादयाम्यहम् ।

यो यथा प्रेरयति मां तस्य तिष्ठामि तत्फला ।। ५

न स्वभावोऽन्यतां धत्ते वह्नेरौष्ण्यमिवैष मे ।

अनेन मुक्त एव स्यामहमित्यस्मि भाविता ।। ६

प्रतिभारूपिणी तेन बाले मुक्तो भविष्यति ।

एतदीयः स्वयं शत्रुः सिन्धुर्नाम महीपतिः ।। ७

जयाम्यहं स्यां संग्राम इत्यनेनास्मि पूजिता ।

तस्माद्विदूरथो देहं तत्प्राप्य सह भार्यया ।। ८

त्वयानया च कालेन बाले मुक्तो भविष्यति ।

एतदीयः स्वयं शत्रुः सिन्धुर्नाम महीपतिः ।। ९

हत्वैनं वसुधापीठे जयी राज्यं करिष्यति ।

श्रीवसिष्ठ उवाच ।

एवं देव्यां वदन्त्या तु बलयोर्युध्यमानयोः ।। 3.47.१०

रविर्द्रष्टुमिवाश्चर्यमाजगामोदयाचलम् ।

चेलुस्तिमिरसंघाता बलानीवारिरूपिणः ।। ११

असृजन्जीवसङ्घान्ये संध्यायां तारका इव ।

शनैः प्रकटतां जग्मुर्नीलाकाशाद्रिभूमयः ।। १२

भुवनं कज्जलाम्भोधेरिवोत्क्षिप्तमराजत ।

पेतुः कनकनिःस्यन्दसुन्दरा रविरश्मयः ।। १३

शैलेषु वरवीरेषु रणे रक्तच्छटा इव ।

अदृश्यत ततो व्योम तथा रणमहीतलम् ।। १४

बाहुभिर्भ्रान्तभुजगं प्रभाभिः कीर्णकाञ्चनम् ।

कुण्डलैः कीर्णरत्नौघं शिरोभिर्दृष्टपङ्कजम् ।। १५

आयुधैः खड्गनीरन्ध्रं शरैः शलभनिर्भरम् ।

रक्ताभास्थिरसंध्याढ्यं ससिद्धपुरुषं शवैः ।। १६

हारैः ससर्पनिर्मोकं कटैरिद्धं सुसंकुलम् ।

लसल्लतं पताकाभिरुरुभिः कृततोरणम् ।। १७

हस्तैः पादैः पल्लवितं शरैः शरवणोपमम् ।

शस्त्रांशुशाद्वलश्यामं शस्त्रपूरैः सकैतकम् ।। १८

कीर्णमायुधमालाभिरुन्मत्तमिव भैरवम् ।

फुल्लाशोकवनाकारं शस्त्रसंघट्टवह्निभिः ।। १९

उदघुंघुमहाशब्दैर्विद्रवत्सिद्धनायकैः ।

सौवर्णनगराकारं बालार्ककचितायुधैः ।। 3.47.२०

प्रासासिशक्तिचक्रर्ष्टिमुद्गरारणिताम्बरम् ।

वहद्रक्तनदीरंहः प्रोह्यमानशवोत्करम् ।। २१

भुशुण्डीशक्तिकुन्तासिशूलपाषाणसंकुलम् ।

शूलशस्त्राहतिच्छन्नकबन्धपतनान्वितम् ।। २२

कालताण्डववेतालकुलारब्धहलारवम् ।

शून्ये रणाङ्गणे दीप्तौ पद्मसिन्ध्वो रथौ चलौ ।। २३

अदृश्येतां नभश्चिह्नौ चन्द्रसूर्यौ दिवीव तौ ।

चक्रशूलभुशुण्ड्यृष्टिप्रासायुधसमाकुला ।। २४

सहस्रेण सहस्रेण वीराणां परिवारितौ ।
विचरन्तौ यथाकामं मण्डलैर्विततारवैः ।। २५
सचीत्कारमहाचक्रपिष्टानेकमृतामृतौ ।
तरन्तौ रक्तसरितौ मत्तवारणलीलया ।। २६
केशशैवलसंपन्ने चक्रचक्रजलेन्दुके ।
वहच्चक्राहतिक्षोभपातिताकुलवारणौ ।। २७
मणिमुक्ताझणत्काररणत्कूबरकारवौ ।
वाताहतपताकाग्रपटत्पटपटारवौ ।। २८
अनुयातौ महावीरैर्भूरिमिर्भीरुसैनिकैः ।
धारा वमद्भिः कुन्तानां शराणां धनुषामपि ।। २९
शक्तीनां प्रासशङ्कूनां चक्राणां कचतां रणे ।
तत्र तौ क्षणमावृत्ये मण्डले भूमिकुण्डले ।। 3.47.३०
उभौ व्यतिबभूवाते संमुखावायुधावुभौ ।
नाराचधारानिकरविक्षेपकरकध्वनौ ।। ३१
अन्योन्यमपि गर्जन्तौ मत्ताब्धिजलदाविव ।
तयोः प्रहरतोर्बाणा वसुधानरसिंहयोः ।। ३२
पाषाणमुसलाकारा व्योमविस्तारिणोऽभवन् ।
करवालमुखाः केचिन्मुद्गराननकाः परे ।। ३३
शितचक्रमुखाः केचित्केचित्परशुवक्त्रकाः ।
केचिच्छक्तिमुखाः केचित्केचिच्छूलशिलामुखाः ।
त्रिशूलवदनाः केचित्स्थूला इव महाशिलाः ।। ३४
प्रलयपवनपातिताः शिलौघा
इव निपतन्ति शिलीमुखास्तदा स्म ।
प्रमिलितमभवत्तयोस्तदानीं
प्रलयविजृम्भितसिन्धुसंभ्रमेण ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे ली० विदूरथसिन्धुसमागमो नाम सप्तचत्वारिंशः सर्गः ।। ४७ ।।